P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-4*(Part-2) December- 2018
E: ISSN NO.: 2349-980X **Shrinkhla Ek Shodhparak Vaicharik Patrika**

# संस्कृतभाषादक्षतासंवर्धनाय संस्कृतभारत्या कृतप्रयत्नाः नवाचाराश्च



**हिम्मत सिंह चौहानः**
शोधच्छात्रः
संस्कृतम् विभागः,
सम्राट–पृथ्वीराज–चौहानः
राजकीय–महाविद्यालयः,
अजमेरः, राजस्थान, भारत



**आशुतोष पारीकः**
सहायक आचार्य एवं
शोधनिर्देशकः,
संस्कृतम् विभागः,
सम्राट–पृथ्वीराज–चौहानः
राजकीय–महाविद्यालयः,
अजमेरः, राजस्थान, भारत

**सारांश**

''भारतस्य प्रतिष्ठे द्वे, संस्कृतं संस्कृतिस्तथा। ''अस्मिन् संसारे अनेकानां भाषाणां प्रयोगो भवति। तासु सर्वासु भाषासु संस्कृतभाषा सर्वोत्तमा विद्यते। संस्कारयुक्ता, दोषरहिता, परिष्कृता भाषा एव संस्कृतभाषा कथ्यते। एषा एव देववाणी अपि अस्ति, परञ्च वर्तमानसमये अस्याः भाषायाः शिक्षणे नवाचाराणाम् अत्यधिकम् आवश्यकता वर्तते। संस्कृतभारतीसंघटनेन अस्मिन् एव संदर्भे संपूर्णे विश्वे सकारात्मकः सफलप्रयासः कृतमस्ति। एभिः विभिन्नैः प्रयत्नैः क्रियन्ते। नवाचारैश्च जनेषु एतादृशी भावना दृढीभूता यत् संस्कृतं कठिनं नास्ति। किञ्चिद एव प्रयासेन अभ्यासेन च सर्वेऽपि संस्कृतसंभाषकाः संस्कृतसंभाषिणः भवितुं शक्नुवन्ति। अधुना यत्र संस्कृतं प्रति जनानां रुचिः दृश्यते तस्य प्रमुखं कारणं तु संस्कृत शिक्षणे प्रयोगे च नवाचाराः एव सन्ति। अतोऽत्र संस्कृतभाषादक्षतासंवर्धनाय वर्तमानयुगे नवाचाराणां विश्लेषणात्मकं समालोचनं तथा च नवाचाराणां उपादेयताविषये विमर्शः प्रस्तूयते।

**मुख्य शब्द** : संस्कृतभारती, संस्कृतसंभाषणम्, संस्कृतभाषा, संस्कृतगृहम्, संवादशाला, विश्व–संस्कृत–पुस्तक–मेला, संस्कृतग्रामयोजना, पत्राचारेण संस्कृतम्, सान्ध्यशिक्षणकेन्द्रम्, प्रमुखवेबसाइट्संकेताः, गूगल, नवाचाराः, संस्कृतम्।

**प्रस्तावना**

**भारतभूषा संस्कृतभाषा विलसतु हृदये–हृदये।**
**संस्कृतिरक्षा राष्ट्रसमृद्धिः भवतु हि भारतदेशे।।**[1]

संस्कृतभाषासाहित्यं जीवनस्य सर्वेषां पक्षाणाम् सुविस्तृतज्ञानविज्ञानपरम्परायाः आधानमस्ति। अस्यां भाषायां विज्ञानं, प्रौद्योगिकी, खगोलविद्या, स्थापत्यकला, चिकित्साविज्ञानं, धातुविज्ञानं, कृषिविज्ञानं, जीवविज्ञानं, वास्तुविद्या, गणितशास्त्रं, अर्थशास्त्रं, प्रबन्धनं, च सम्मिलितानि। प्राचीनसाहित्यशास्त्राणां ज्ञानसम्पदम् अवगन्तुं, नवाचाराणां नवीनतमोपायानाम् अन्वेषणं कर्तुं, भारतदेशं विश्वे ज्ञानाधारितदेशेषु अग्रणी विधातुं विश्वभाषा संस्कृतभाषा अत्यावश्यकी।

**कृत्वा नवदृढसंकल्पम्, वितरन्तो नवसन्देशम्।**[2]

संस्कृतभाषायाः प्रचार–प्रसारनिमित्तं तथा च एतां भाषां जनभाषां कर्तुं 'संस्कृतभारती' संघटनं सम्पूर्णे भारते एवञ्च विश्वस्य केषुचिद् देशेषु कार्यं करोति। 'हिन्दूसेवाप्रतिष्ठानम्' द्वारा 'संस्कृतं वदतु' अभियानस्य प्रारंभः कृत्वा संस्कृत–संभाषण–शिविराणाम् उपस्थापनं कृतम्। दिनांकः 16 नवम्बर, 1987 दिवसस्य 'टाइम्स ऑफ इण्डिया' समाचारपत्रे वार्ता आसीत् यत्– ''संस्कृतस्य तेन प्रचारकेण गृहेषु, मलीनवसतिषु व्यावसायिककेन्द्रेषु, शिक्षा–संस्थानेषु तथा च संसदभवने अपि दशदिवसात्मकं 'संस्कृत वदतु' इति कार्यक्रमम् आयोजितम्। दशदिवसेषु एव प्रशिक्षणार्थिनः सम्यक् संस्कृतं वदन्ति। देहल्याः अस्मिन् कार्यक्रमे चत्वारिंशत् सांसदाः भागं गृहीतवन्तः।''[3]

वर्तमानयुगे संस्कृतभाषायाः स्थितिविषये संस्कृतभारत्याः संस्थापकः श्रीमन् चमूकृष्णशास्त्री लिखति– ''अन्यभाषाणाम् इव संस्कृतस्य अपि भाषारूपेण सार्वत्रिकः प्रयोगः भवेदिति वयम् आकांक्षामहे चेत्, राष्ट्रजीवनस्य सर्वेष्वपि क्षेत्रेषु संस्कृतं पुनरागच्छेदिति अपेक्षामहे चेत्, च तस्य पुनरानयनस्य कार्यस्य प्रारम्भः कुतः करणीयः इति प्रश्न उदेति। संस्कृतं सरलम् उत कठिनं, वाचिकं उत ग्रान्थिकं, प्रासंगिकम्/उपयोगयोग्यम् उत अप्रासंगिकम् इत्येतादृशाः भावाः जनानां मनस्सु प्रादुर्भवन्ति विद्यार्थिदशायामेव।''[4]

संस्कृतभाषाविषये एतत् सनातन–सत्यं सर्वे जानन्ति यत् प्राचीनकाले अस्माकं देशे संस्कृतभाषा लोकभाषा आसीत्। वर्तमानसंदर्भे पश्यामः तर्हि दृश्यते यद् अस्माभिः एव संस्कृतस्य निधेः सुरक्षा कर्त्तव्या। इयं भाषा भारतस्य गौरवम्

P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-4*(Part-2) December- 2018
E: ISSN NO.: 2349-980X **Shrinkhla Ek Shodhparak Vaicharik Patrika**

उद्घोषयति। संस्कृतस्य रक्षणेन सह अस्य दृढीकरणम् अपि आवश्यकम्। भारतीयानां विश्वासानुसारं सृष्टिकर्तुः ब्रह्मणः वेदमयी संस्कृतवाणी निस्ससार–

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।[5]**

एतादृशं सिद्धान्तम् अनुसृत्य एव संस्कृतभारतीपक्षतः संस्कृतस्य प्रचार–प्रसारार्थं विभिन्न–प्रकल्पाः प्रचलन्ति। तेषु विशिष्टतया केचन् एवं सन्ति–

1. पञ्चसहस्रः परिवाराणां गृहाणि 'संस्कृतगृहम्' इति रूपेण समुद्घोषिताः।
2. एकलक्षम् अध्यापकाः संस्कृतमाध्यमेन शिक्षणं कारयितुं प्रशिक्षिताः।
3. त्रिशताधिकं श्रव्यमुद्रिकाः तथा पुस्तकानि च निर्मितानि सन्ति।
4. संस्कृतभारतीद्वारा प्रकाशित–मासिक–पत्रिका 'संभाषण–संदेशः' विश्वे विंशतिः देशेषु एकलक्षाधिकजनैः नियमितरूपेण पठ्यन्ते।
5. विश्वे नवत्रिंशत् देशेषु संस्कृतसंभाषणाय शिविराणां तथा च संवादशालानाम् आयोजनं संस्कृतभारती संघटनम् अनवरतरूपेण करोति।

संस्कृतभारत्याः अखिलभारतीयसंघटनमंत्रिणा दिनेशकामतमहोदयेन 'वेबदुनिया' वार्तायां संस्कृतभारत्याः विषये उक्तं यत्– ''संस्कृतभारती संस्कृतस्य अवबोधनाय चत्वारिंशत् सहस्राः अधिकम् एकलक्ष्यं संस्कृतसंभाषणशिविराणाम् आयोजनं कृतवती। एतेषु शिविरेषु चतुर्नवतिलक्ष्यजनाः प्रशिक्षणं प्राप्तवन्तः। एतेषु निरक्षरजनाः अपि आसन्। पत्राचारेण अपि एकादशभाषासु संस्कृतशिक्षणं प्रचलति। अस्मिन् आंग्लं हिन्दीम् अतिरिच्य मराठी, गुजराती, बंगाली, असमी आदि माध्यमेन संस्कृतं ज्ञातुं शक्नुमः। तेनोक्तं यत् अहमपि श्रुत्वा–श्रुत्वा एव संस्कृतम् अधीतवान् इति।''[6]

समान–वैचारिक–शक्तिमाध्यमेन सर्वेशाम उद्देश्यानां पूर्तिः संभवा वर्तते। अतः समानविचाराणां समत्वभावनया लोकसंस्तुतिः सम्मतिः च प्रत्येकयुगे समाजस्य परमावश्यकता अस्ति एव। अस्मिन् विषये ऋग्वेदे वर्णितम् अस्ति यत् –

**समानो मन्त्रः समितिः समानी, समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रये वः, समानेन वो हविषा जुहोमि।।[7]**

समाजेन यस्मिन्–कस्मिन् अपि युगे अस्य मन्त्रस्य महत्त्वं नैव अधीतं तद् युगं तस्य समाजस्य कृते नितान्तकष्टप्रदम् अभवत्। नवाचाराणां सर्वदा स्वागतं भवितव्यम्। भारतीय– संस्कृत्यां नवीनसिद्धान्तानां तदनुसारं आचार–विचाराणां सर्वदा समादरः कृतोऽस्ति, यतोहि नवाचारेषु समकालीनसमाजस्य सामाजिक–आर्थिक–शैक्षिक–राजनीतिक–धार्मिक–न्यायिक – नैतिक–इत्यादयः सर्वासाम् आवश्यकतानां पूर्तिः दृढसामर्थ्येन भवति एव। अतः संस्कृतभाषायाः अध्ययनाध्यापनेऽपि युगानुसारं परिवर्तनस्य आवश्यकता निश्चितरूपेण भवति। एतद् एव 'संस्कृत भारत्याः' विचारोऽस्ति। नवाचाराणां स्वागतं कुर्वन्तः महाकविना कालिदासेन स्वस्य प्रसिद्धनाटके 'मालविकाग्निमित्रे' लिखितं यत्–

**पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्तरद्भजन्ते, मूढः परप्रत्ययनेयबुद्धिः।।[8]**

संस्कृतभारती अपि विभिन्न–नवाचारान् आत्मसात् कृत्वा कार्यं विधीयमाना अस्ति। संस्कृतभाषा दक्षतासंवर्धने नवाचाराणां महती भूमिका भवति। क.वे. रामकृष्णाचार्यः अस्मिन् विषये कथयति– ''अस्मिन् आधुनिके वैज्ञानिके युगे ऐहिकफलदायिन्याः विद्यायाः एव आदरः दृश्यते। अतः संस्कृतस्यापि ऐहिकफलसाधकत्वं व्यवस्थापनीयम्। वस्तुतः संस्कृते आधुनिकविज्ञानोपयुक्ताः अनेके विषयाः सन्ति। परन्तु तेषाम् आधुनिकवैज्ञानिकसिद्धान्तैः सह तोलयित्वा समायोपयुक्तताः प्रकाशयितुं समर्थः गणः नास्ति।''[9]

अतः संस्कृतभारती संघटनं संस्कृतभाषाम् ऐहिकफलसाधकरूपेण स्थापयितुं प्रयत्नशीला अस्ति। संस्कृतभारतीपक्षतः नवाचारपद्धतिमाध्यमेन संस्कृतसंभाषण–पाठ्यक्रमेण, पत्राचार– पाठ्यक्रमेण तथा च 'वेबसाइट्' माध्यमेन विदेशेषु अपि प्रशिक्षणं प्रारब्धं कृतमस्ति। यथा–

**विश्वसंस्कृतपुस्तकमेला, बैंगलुरुः**

संस्कृतभारत्याः तत्त्वावधाने 2011 तमे वर्षे जनवरीमासस्य दशमदिनांके बैंगलुरूमहानगरे चतुर्दिवसात्मकमेला आयोजितम्। अस्मिन् चतुःकोटिमितं रूप्याकाणां संस्कृतपुस्तकानां विक्रयणं जातम्। अस्मिन् मेला मध्ये षट्विंशतिः राज्याणाम् अष्टसहस्त्रजनाः प्रतिभागिरूपेण भ्रमणं दर्शनं च कृतवन्तः।

**संवादशाला**

संस्कृतभारतीपक्षतः देहलीमहानगरस्य मण्डोली ग्रामे दुर्गामातामंदिरे संवादशालायाः आयोजनं वर्षपर्यन्तं चतुर्दशदिवसात्मकम् अर्थात् मासे द्वयम् आवासीय–संस्कृत संभाषणस्य वर्षपर्यन्तं प्रचाल्यते। अस्मिन् प्रकल्पे अमेरिका, इंग्लैण्ड, रूस, चीन, जर्मनी, कनाड़ा, दक्षिण अफ्रीका, आयरलैण्ड, यूक्रेन, त्रिनिदाद, निकारागुआ, श्रीलंका, थाइलैण्ड, कम्बोडिया, नेपाल, भूटानः इत्यादयः विंशत्याधिकदेशानां नागरिकाः भारतीयाश्च प्रशिक्षणं प्राप्तवन्तः।

**''पाठयेम संस्कृतं जगति सर्वमानवान्।।''[10]**

अस्य उद्देश्यमिदम् आधारीकृत्य संस्कृतसंवादशालायाः आयोजनं क्रियते। अत्र संस्कृतातिरिक्तम् अन्यभाषाणां प्रयोगः सर्वथा वर्जितोऽस्ति।

**संस्कृतग्रामयोजना संस्कृतभारती द्वारा एतादृशानां ग्रामाणां विकासः कृतः यत्र प्रत्येकं जनः संस्कृतसंभाषणे दक्षः स्यात्।**

**'ग्रामे नगरे समस्त राष्ट्रे रचयेम संस्कृत भवनम्।''[11]**

एताम् उक्तिं स्वीकृत्य संस्कृतभारतीपक्षतः बैंगलुरूतः शतकिलोमीटर दूरं 'मुत्तुरु' नाम, ग्रामः संपूर्णे विश्वे 'संस्कृतग्रामः' इति रूपेण प्रसिद्धः। मध्यप्रदेशस्य 'झीरी' 'मोहद' च, उत्तराखण्डे 'भन्तौला ग्रामः' अपि संस्कृतग्रामाः घोषिताः। राजस्थानस्य बूँदी जनपदे 'कापरेन' 'गनोडा' ग्रामौ अपि संस्कृतग्रामं विधातुं संस्कृतभारत्याः प्रयासाः विधीयन्ते।

**बालकेन्द्रम्**

संस्कृतसंभाषणं प्रशिक्षणाय संस्कृतभारती बालकेन्द्राणाम् आयोजनं करोति। यस्मिन् एकः शिक्षकः स्वस्य क्षेत्रे ये लघवः बालकाः भवन्ति तान् सरलपद्धत्या

संस्कृतसंभाषणं प्रशिक्षयन्ति। सप्त तः द्वादशवर्षीयाः बालकाः क्रीडायां, गीतमाध्यमेन, कथा–श्लोकमाध्यमेन च संस्कृतावगमनम् अत्यन्तसरलरीत्या सहजतया च कुर्वन्ति।

**संस्कृतसंभाषणशिविरम्**

संस्कृतभारती, लोकभाषा–प्रचार–समितिः एवञ्च अन्याः संस्थाः संस्कृतसंभाषणशिविराणाम् आयोजनं कुर्वन्ति। जनानां मनसि चिन्ता भवति यत् संस्कृतभाषा कठिना अस्ति, तस्याः चिन्तायाः अपाकरणं संस्कृतभारती एतेन गीतेन करोति।

**सुरससुबोधा विश्वमनोज्ञा, ललिता हृद्या रमणीया।**
**अमृतवाणी संस्कृत भाषा नैव क्लिष्टा न च कठिना।।**[12]

**पत्राचारेण संस्कृतम्**

गृहे उपविश्य एव पत्राचारमाध्यमेन संस्कृतस्य प्रशिक्षणं प्रददाति संस्कृतभारती–संघटनम्। अस्य कालावधिः द्विवर्षीया अस्ति, यस्यां चतसृणां परीक्षाणाम् आयोजनं क्रमशः 'प्रवेशः, परिचयः, शिक्षा, कोविद्' उपाधिमाध्यमेन प्रमाणपत्रीयप्रशिक्षणमस्ति।

**संस्कृतगृहम्**

संपूर्णभारते संस्कृतभारती संस्कृतगृहाणां निर्माणाय प्रयत्नशीला अस्ति। भारतम् अतिरिच्य विश्वस्य अनेकेषु देशेषु भारतीपक्षतः सहस्रादिक–संस्कृतगृहाणां निर्माणं कृतमस्ति।

**सान्ध्यशिक्षणकेन्द्राणि**

संस्कृताभिमानिनः संस्कृतस्य ज्ञानपिपासूनां संख्या समाजे वर्धमाना अस्ति। अतः संस्कृतभारतीपक्षतः स्थाने–स्थाने, ग्रामे–ग्रामे, नगरे–नगरे सान्ध्यशिक्षणकेन्द्रम् आरब्धम्।

**'ग्रामं–ग्रामं गच्छामः संस्कृतशिक्षां यच्छामः।।**[13]

तत्र संस्कृतस्य अधिगमाय जनाः आगच्छन्ति तथा च संस्कृतस्य प्रशिक्षणं प्राप्नुवन्ति। संस्कृतभारत्याः एवं विधिनां नवाचाराणां समाजे सञ्चरणाय महती भूमिका वर्तते।

**'संस्कृतं पठ–आधुनिको भव।'**[14]

**प्रमुखवेबसाइट्संकेताः**

संस्कृतभाषाशिक्षणे दक्षतासंवर्धने च प्राच्यपरम्परया सह आधुनिक– तकनीकस्य प्रयोगोऽपि अत्यावश्यको वर्तते। संस्कृतशिक्षकैः एतेषां वेबसाइट्स–संकेतानां वारं–वारम् अन्वेषणावलोकनम् अवश्यमेव करणीयम्। अधुना एतादृश्यः विविधाः वेबसाइट्स विद्यमानाः सन्ति याभिः संस्कृतभाषा आधुनिकतमा सञ्चजाता। तेषु प्रसिद्धः वेबसाइट्स संकेताः एवं सन्ति–

http://sanskrit.nic.in
http://www.samskritashikshanam.in
http://www.samskrittutorial.in
http://www.samskritpromotion.in
http://www.sanskritdictionary.com/
http://www.sanskritdocuments.org/
http://spokensanskrit.org/

संस्कृतप्रवेशाय एतेषां वेबसाइट्स संकेतानां तत्र प्रस्तुतानां विविध–विषयाणाम् अपेक्षितं वर्तते, तैः संस्कृतक्षेत्रे नवोपागमानां, नवीनपद्धतीनां, विचाराणां नवाचाराणां च ज्ञानं सहजतया प्राप्तुं शक्यते।

**गूगल (www.google.com)**

'गूगल' मध्ये संस्कृतभाषायाः विषये संस्कृतान्वेषणसमये प्राप्तपरिणामानां संख्या आश्चर्यवर्धिका वर्तते।[15] वयं जानीमः यद् एषा मात्रं शब्दगणना एव अस्ति तथापि एतेषु मात्रम् एकप्रतिशतपर्यन्तं अस्माकं चिन्तनं भवेत् तर्हि अपि संस्कृतवर्धनाय पर्याप्तम्। प्रमुखान्वेषणपरिणामानां संख्या अत्र लिखितमस्ति–

| Google Search Results (Approx.) | |
|---|---|
| Sanskrit | 4,44,00,000 |
| Samskrit | 1,06,000 |
| Ved | 24,90,00,000 |
| Sanskrit Vyakaran | 2,07,000 |
| Learn Sanskrit | 7,20,000 |
| Sanskrit Sahitya | 4,24,000 |
| Sanskrit Bharati | 4,53,000 |
| Sanskrit Video | 53,90,000 |
| Why should I learn Sanskrit | 8,62,000 |
| Why should I learn Sanskrit (Video) | 15,500 |
| Why should I learn Sanskrit (News) | 10,100 |
| Why should I learn Sanskrit (Images) | Countless |
| I Love Sanskrit | 19,10,000 |

एतेषां ज्ञानेन संस्कृतक्षेत्रे संवर्धनपक्षे अस्माकं सहयोगः भवितुं शक्नोति। यतोहि पूर्वं संगणक–मध्ये अथवा अन्तर्जाले एतादृशी व्यवस्था संस्कृतनिमित्तं नासीत्, परन्तु इदानीं सर्वत्र अस्माभिः श्रूयते यत् – **''संस्कृतभाषा संगणकस्य कृते सर्वश्रेष्ठा उपयोगी च भाषा अस्ति।''**[16]

संस्कृतभाषाविषये बिहाराज्यस्य भूतपूर्व राज्यपालः उक्तवान्– ''यः संस्कृतं न जानाति, सः संस्कृतः (Cultured) न भवति, यतः प्राचीनकालादेव अस्माकं जीवनपद्धतिः परम्परा च संस्कृते प्रकटिता वर्तते। यदि वर्तमानयुगेऽपि वयमुन्नतिं वाञ्छामः तर्हि संस्कृतमेव जीवनाधारत्वेन पुनः स्वीकर्तव्यं भवेत्। संस्कृतं विना अस्माकं सर्वे प्रयत्नाः निष्फलाः सन्ति इति।''[17]

**निष्कर्ष**

अतः एतत् तु प्रमाण्यते यद् वयं नवाचाराणां प्रयोगेण संस्कृतभाषां सरलतया ज्ञातुं शक्नुमः तथा च संस्कृतस्य संभाषणं ज्ञात्वा एतां भाषां जनभाषां कर्तुम् अस्माकं संकल्पपूर्तिम् अपि वयं कर्तुं शक्नुमः। संस्कृतभाषा रटनात्मकभाषा नास्ति, अपितु एतस्याः स्वरूपं रचनात्मकं, ज्ञानपरकं, व्यावहारिकं, प्रायोगिकं, गौरवमयं, रोचकपूर्णं च अस्ति।

**''चिरनवीना संस्कृता एषा, गीर्वाणभाषा।''**[18]

अतः संस्कृतभाषा सर्वेषां हृदये विराजमाना भवेत् एवञ्च नवाचाराणाम् आत्मीकरणमाध्यमेन एतस्य जयघोषः संपूर्णविश्वे भवेद् इति कामयामहे।

**पठामि संस्कृतं नित्यं वदामि संस्कृतं सदा।**
**ध्यायामि संस्कृतं सम्यक् वन्दे संस्कृतमारतम्।।**[19]
**संस्कृतभारतम्! समर्थभारतम्!!**

**अंत टिप्पणी**

1. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
2. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
3. *टाइम्स ऑफ इण्डिया–दिनांक 16 नवम्बर, 1987*

4. *शिक्षकाधीनं संस्कृतम्–चमूकृष्णशास्त्री, संस्कृतभारती, नवदेहली, पृ.सं. 2*
5. *ऋग्वेद, परोपकारिणी सभा, अजमेर*
6. *http://hindi.webdunia.com/national-hindi-news/sanskrita-bharti-dinesh-kamath-118052200096 1.html*
7. *ऋग्वेद, परोपकारिणी सभा, अजमेर 10.191.3*
8. *मालविकाग्निमित्रम्–महाकवि कालिदास, महालक्ष्मी प्रकाशन, आगरा अंक 1, श्लोक 2*
9. *ज्ञाने धर्मः उत प्रयोगे–चमूकृष्णशास्त्री, संस्कृतभारती, नवदेहली, उपोद्‌घात् पृ.सं. 3*
10. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
11. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
12. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
13. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
14. *संस्कृत उद्‌घोषपत्रम्–संस्कृतभारती, केरलप्रान्तः*
15. *http://www.google.co.in/search?q=sanskrit&oq=sanskrit&aqs=chrome.69i57j69i5912j6912j69603.1442 8j0j7 & sou recid=chrome&ie=UTF-8*
16. *रुचिरा– द्वितीयः भागः, पाठ सं. 13, अमृतं संस्कृतम्, कक्षा–सप्तमी*
17. *श्री अनन्तशयनम् अय्यंगारः (भूतपूर्वराज्यपाल, बिहार) के विचार संग्रह से संकलित*
18. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*
19. *गीतसंस्कृतम्–संस्कृतभारती, नवदेहली*


**सन्दर्भ ग्रंथ सूची**


*अमरकोषः (2012 ई.)–सम्पादक–प्रो. सत्यदेव मिश्र, जगदीश संस्कृत पुस्तकालय, जयपुर।*

*सम्भाषणसोपानम्–जनार्दन हेगड़े (2005 ई.), संस्कृतभारती, बैंगलूरु।*

*अभ्यासदर्शिनी–जनार्दन हेगड़े (2016 ई.), संस्कृतभारती, बैंगलूरु।*

*कौशलबोधिनी–डॉ. विश्वास (2005 ई.), संस्कृतभारती, नवदेहली*

*संस्कृत शिक्षण–डॉ. श्रीमती सुनिता गौड़, डॉ. कृष्ण चन्द्र गौड़, अरिहन्त शिक्षा प्रकाशन, जयपुर ।*

*संस्कृत का शिक्षण–शास्त्र–अमृतलाल दवे, राधा प्रकाशन मन्दिर (प्रा.लि.), आगरा।*

*संस्कृतशिक्षणम् (2016 ई.)–डॉ. उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी।*

*शैक्षिकप्रविधिः (2011 ई.)–डॉ. माताप्रसाद शर्मा, जगदीश संस्कृत पुस्तकालय, जयपुर।*

*अनुवाद चन्द्रिका (2013 ई.)–चक्रधर नौटियाल 'हंस', मोतीलाल बनारसीदास, वाराणसी।*

*रचनानुवाद कौमुदी (2016 ई.)–डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी।*

*शैक्षिकप्रविधिः (2014 ई.)–डॉ. रमाकान्त मिश्र, चौखम्भा सुरभारती प्रकाशन, वाराणसी।*

*शिक्षा सबके लिए (2011 ई.)–प्रो. जमनालाल बायती, रचना प्रकाशन, जयपुर।*

*सर्जनात्मक भाषा और आलोचना (2002 ई.)–बी.एल. आच्छा, रचना प्रकाशन, जयपुर।*

*संस्कृतगीतशतकम् (2012 ई.)–प्रो. सुभाष वेदालंकार, अलंकार प्रकाशन, जयपुर।*